শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীপরাশরভট্টার্যৈরনুগৃহীতম্

# ॥ শ্রীরঙ্গনাথস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরঙ্গনাথস্তোত্রম্ ॥

শ্রীপরাশর ভট্টার্যঃ শ্রীরঙ্গেশপুরোহিতঃ।
শ্রীৱৎসাঙ্কসুতঃ শ্রীমান্ শ্রেযসে মেঽস্তু ভূযসে॥

সপ্তপ্রাকারমধ্যে সরসিজমুকুলোদ্ভাসমানে ৱিমানে
কাৱেরীমধ্যদেশে মৃদুতরফণিরাড্ভোগপর্যঙ্কভাগে।
নিদ্রামুদ্রাভিরামং কটিনিকটশিরঃপার্শ্ৱৱিন্যস্তহস্তং
পদ্মাধাত্রীকরাভ্যাং পরিচিতচরণং রঙ্গরাজং ভজেঽহম্॥ **1** ॥

কস্তূরীকলিতোর্ধ্ৱপুণ্ড্রতিলকং কর্ণান্তলোলেক্ষণং
মুগ্ধস্মেরমনোহরাধরদলং মুক্তাকিরীটোজ্জ্ৱলম্।
পশ্যন্মানসপশ্যতোহররুচঃ পর্যাযপঙ্কেরুহং
শ্রীরঙ্গাধিপতেঃ কদা নু ৱদনং সেৱেয ভূযোঽপ্যহম্॥ **2** ॥

কদাঽহং কাৱেরীতটপরিসরে রঙ্গনগরে
শযানং ভোগীন্দ্রে শতমখমণিশ্যামলরুচিম্।
উপাসীনঃ ক্রোশন্ মধুমথন ! নারাযণ ! হরে !
মুরারে ! গোৱিন্দেত্যনিশমনুনেষ্যামি দিৱসান্॥ **3** ॥

কদাঽহং কাৱেরীৱিমলসলিলে ৱীতকলুষো
ভৱেযং তত্তীরে শ্রমমুষি ৱসেযং ঘনৱনে।
কদা ৱা তৎ পুণ্যে মহতি পুলিনে মঙ্গলগুণং
ভজেযং রঙ্গেশং কমলনযনং শেষশযনম্॥ **4** ॥

পূগীকণ্ঠদ্ৱযসসরসস্নিগ্ধনীরোপকণ্ঠাং
আৱির্মোদস্তিমিতশকুনানূদিতব্রহ্মঘোষাম্।

মার্গেমার্গে পথিকনিৱহৈরুঞ্ঝ্যমানাপৱর্গাং
    পশ্যেযং তাং পুনরপি পুরীং শ্রীমতীং রঙ্গধাম্নঃ॥ **5**॥

ন জাতু পীতামৃতমূর্চ্ছিতানাং
    নাকৌকসাং নন্দনৱাটিকাসু।
রঙ্গেশ্ৱর ৎৱৎপুরমাশ্রিতানাং
    রথ্যাশুনামন্যতমো ভৱেযম্॥ **6**॥

শ্রীরঙ্গং করিশৈলমঞ্জনগিরিং তার্ক্ষ্যাদ্রিসিংহাচলৌ
    শ্রীকূর্মং পুরুষোত্তমং চ বদরীনারাযণং নৈমিশম্।
শ্রীমদ্দ্বারৱতীপ্রযাগমথুরাযোধ্যাগযাঃ পুষ্করং
    সালগ্রামগিরিং নিষেৱ্য রমতে রামানুজোঽযং মুনিঃ॥ **7**॥

অসন্নিকৃষ্টস্য নিকৃষ্টজন্তোঃ
    মিথ্যাপৱাদেন করোষি শান্তিম্।
ততো নিকৃষ্টে মযি সন্নিকৃষ্টে
    কাং নিষ্কৃতিং রঙ্গপতে করোষি॥ **8**॥

॥ ইতি শ্রীরঙ্গনাথস্তোত্রং সমাপ্তম্॥